National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 133-136
© 2025 NJHSR
www.sanskritarticle.com

**गणेश चन्द्र पण्डा**
शोधछात्रः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**गणेश चन्द्र पण्डा**
शोधछात्रः ,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# मनोविज्ञानम्

**गणेश चन्द्र पण्डा**

वेदवेदाङ्गेषु मनोविज्ञानविषये बहुत्र चर्चा कृता दृश्यते । मनन क्रियाद्वारा यानि कार्याणि संभवति ते सर्वे शुभप्रदफलानि ददति । अस्माकं शरीरे यः मनः विद्यमानः वर्तते सः सर्वदा चंचल स्वभावेन युक्तः वर्तते। तस्य स्थिरत्वं कर्तुं योगेन, ध्यानेन च संभवति । सर्वे तस्योऽपरि विजय प्राप्तुं न शक्नुवन्ति। सः मनः **"ज्ञानेन्द्रियः कर्मेन्द्रियस्य"** च राजा भवति, अतः तस्य चञ्चलस्वभावशक्तिः द्विगुणः वर्तते। यदि मनुष्येन निश्चयं क्रियते दृढसंकल्पं वा क्रियते तर्हि ध्यानेन, योगेन च, एकाग्रं कृत्वा साधयति । मनः सर्वत्रव्याप्तः वर्तते तस्य शक्तिः, तस्य, गतिः, अनुमानं कर्तुं न शक्नुमः। यथा बृहदारण्यकोपनिषदि उक्तं **" मनो बै सम्राट्, परमं ब्रह्म"**[1]॥

मनस् मनुष्याणामेव न प्रत्येकप्राणीनां साधनं भवति। मनसः स्थान आत्मनः समीपे हृदये अस्ति । मनसि चन्द्रस्य शीतलता भवति । मनः अत्यन्त वेगशीलः भवति। मनसः सर्वत्र सत्ता भवति। मनः कदापि वृद्धत्वं न प्राप्नोति। पञ्च ज्ञानेन्द्रियः पञ्च कर्मेन्द्रियः च मनसः आधिपत्यं स्विकुर्वन्ति। केवलं मनः एव एकमात्रसाधनं भवति, यः अस्माकं शरीरे चेतनां जागरयति, सः मनः सुषुप्ति अवस्थासु अपि अस्माकं शरीरे आत्मना सह जागृतावस्थायां भवति। तैत्तिरीयब्राह्मणे उक्तम् - **चन्द्रमा मनसि श्रितः, "मनो हृदये (श्रितम्)**[2]।

यजुर्वेदेऽपि उक्तम् - **मनसा मन्यन्ते ज्ञायन्तेः सर्वे व्यवहाराः येनाऽन्तः करणेन**[3]॥

मनोविज्ञानस्य अन्ते केचन विशिष्ट विषयाः भवन्ति यथा –

1 स्नायुमण्डलम् - Nervous System
2 संवेदना - Sensation
3 प्रत्यक्षीकरणम् - Perception
4 अवधानं ध्यानं वा - Attention
5 पठनम् - Learning
6 स्मरणम् - Remembering
7 विस्मरणम् - Forgetting
8 कल्पना - Imagination
9 चिन्तनम् - Thinking
10 भाव अनुभूतिः वा - Feeling
11 संवेगः - Emotion
12 प्रेरणा - Motivation
13 चेतना - Consciousness
14 स्वप्नः – Dream
15 बुद्धिः - Intelligence
16 योग्यता - Aptitude
17 व्यक्तित्वम् - Personality
18 साफल्यम् – Success

19 विफलम् - Failure
20 उपलब्धिः - Achievement
21 विक्षिप्तः - Frustration
22 भयम् - Fear
23 संङ्कल्पः - Determination
24 सत्यम् - Truth
25 असत्यम् - Untrue
26 विचलितम् - distracted
27 अहंकारः - Ego
28 वंशानुक्रमं वातावरणञ्च - Heredity and Environment) इत्यादि

आधुनिक समये मनोविज्ञानविषये विविधक्षेत्रेषु विविध-स्थानेषु अस्य अनेकाऽनेक शाखाः प्रचलिताः सन्ति ।

यथा-**"बालमनोविज्ञानम्, शिक्षामनोविज्ञानम्, समाजमनोविज्ञानम्, उद्योगमनोविज्ञानम्,न्यायसंगतमनोविज्ञानम्, वाणिज्यमनोविज्ञानम्, अपराधमनोविज्ञानम्, अपराधबोध-मनोविज्ञानम्, परामनोविज्ञानम्, स्नायुमनोविज्ञानम्, बुद्धिमनोविज्ञान।** इत्यादि॥

ब्राह्मण ग्रन्थेषु मनः ब्रह्म इति कथयति । सः सर्वशक्तिमान्, परमात्मायाः स्वरूपं वर्तते । यथा- **"मनो ब्रह्म"**[4] मनः सृष्टिकर्ता प्रजापतिः इति वदति । **"मनोवै प्रजापतिः"**[5] मनसः कल्पना द्वारा एव समस्तसृष्टिः वर्तते । मनः यथा इच्छति तथैव भवति, अतः तं सर्वम् इति कथयति । यथा- **मन एव सर्वम्**[6] मनसः शक्तिमनन्तमस्ति अतः तम् अनन्तं, अपरिमितं च इति कथ्यते। यथा- **"अनन्तं वै मनः"**[7] **"मनोवा अपरिमितम्"**[8] मनसि अलौकिकदिव्यशक्तयः विद्यमानाः सन्ति, अतः तं देव इत्ति कथयन्ति । यथा- **"मनो देवः"**[9] मनसि प्रेरणा शक्तिः, चेतना शक्तिः चाऽस्ति अतः तम् अग्निः इति वदति । यथा- **मन एवाग्निः**[10] मनसि कल्पनाशक्तिः अपरिमिता भवति, तस्य गतिः कल्पनां कर्तुं न शक्यते, अतः तं समुद्रः इति कथ्यते। यथा- **"मनो वौ समुद्रः"**[11] मनः विचाराणां महासागरः अस्ति तान् विचारान् प्रकटयितुं प्रवहन्त्यः कुल्या इव वाणी द्वारा भवति । अतः वाणीं मनसः कुल्या इति कथ्यन्ते । यथा**- "तस्य मनसः एषा कुल्या यद् वाक्"**[12] मनः प्रजापतिः परम्पिता परब्रह्मणः विशिष्ट शरीरः अस्ति । यथा- **"अपूर्वा (प्रजापतेस्तनुः) तन्मनः"**[13]॥ मनः एव सर्वदा नानाप्रकारकाः सृष्टिः रचनां करोति। मनसः वाण्याः च प्रगाढ संबन्धः भवति । यानि विचाराणि मनः विचारयति तानि सर्वाणि विचाराणि वाण्या प्रकटयति। यथा- **यद् हि मनसाऽभि गच्छति, तद् वाचा वदति**[14]।। मनसि एव आत्मा प्रतिष्ठितः अस्ति, इत्युक्ते मनः एव आत्मनः सर्वाणि कार्याणि साधयति। यथा- **मनसि हि अयमात्मा प्रतिष्ठितः**[15]।

मनः प्राणानामधिपतिः अस्ति। मनः येन प्रकारेण प्राणान् आदिशति तथैव प्राणाः चलन्ति कार्यं कुर्वन्ति वा। यथा- **मनो वै प्राणानाम् अधिप्रतिः**[16]॥ अस्य अभिप्रायम् एवमस्ति यत् मनसः आदेशानुसारं स्नायुमण्डलम् एवं रक्तप्रवाहः संचरति। समस्त प्रत्यक्षीकरणानां कार्यं मनः करोति। मनः एव पश्यति, मनः एव शृणोति । यथा- **मनसा ह्येव पश्यति, मनसा शृणोति**[17] ॥

शतपथब्राह्मणे मनसः विभिन्नरूपाणां विषये महत्वपूर्णचर्चा कृता॥ यथा- कामः (इच्छा), संङ्कल्पः (विचारः), विचिकित्सा (उहापोह, सन्देह), श्रद्धा, अश्रद्धा, धृतिः (धैर्यम्), अधृतिः (अधीरता) ह्रीः (लज्जा) धीः (ज्ञानं)' भीः (भयम्) च एतेषामनुभूतिः मनः द्वारा भवति। यथा- **"कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिः ह्रीः धीः भीः इत्येतत् सर्वं मन एव"**[18]॥ अनेन प्रकारेण उपनिषत्सु मनसः विधिः गुणः, कर्माणाञ्च वर्णनं कृता दृश्यते । मनः महान् शक्तिः अस्ति। तस्य सर्वोपरि अधिकारः भवति। सः साक्षात् परमेश्वरस्य अभिन्नरूपमस्ति, अतः तं सम्राट्, परब्रह्म च कथ्यते। यथा- **"मनो वै सम्राट्, परमं ब्रह्म"**[19]॥ मनः प्रकाशकः अस्ति, सः अज्ञानरुपी अन्धकारं नाशयित्वा ज्ञानरूपी प्रकाशं प्रज्वालयति। अतः तं ज्योतीति नामेन संबोधयन्ति। यथा- **"मनो ज्योतिः"**[20] मनः चेतनारुपम् अस्ति। यथा मनसः प्रवृत्ति भवति, तथैव मनुष्याणां स्वभावः व्यक्तित्वञ्च विकसति। अतः उपनिषदि कथयति यत् **"अयं पुरुषो मनोमयः"**[21]॥ मनुष्यस्य मनसः अध्ययनं तस्य व्यक्तित्वस्य अध्ययनं भवति। तस्य इच्छाशक्तिः, तस्य सङ्कल्पश्च तस्य व्यक्तित्वं निर्माति। अतः उपनिषदि पुरुषं काममयं वा इच्छास्वरूपं कथयति। यथा- **अयं काममयः पुरुषः**[22]॥ मनसः स्वरूपं चेतना अस्ति। अतः प्राणीनां शरीरे आत्मारूपे मनः प्रतितिष्ठति। यथा-**"मन एवास्य आत्मा"**[23]॥ मनसि कर्तृत्वं निर्मातृत्वं च अस्ति, अतः सः आत्मारूपः अस्ति। प्राणमयः शरीरापेक्षया मनोमयशरीरः सूक्ष्मः अस्ति। अतः मनोमयशरीरं सूक्ष्मात्मा इति कथ्यते। यथा- **अन्योऽन्तर आत्मा मनोमयः**[24]॥ अयं चराचरसमस्तजगत् रूपीयज्ञे मनः एव ब्रह्मा अस्ति। सः एव अयं सृष्टिचक्रस्य निर्देशकः। यथा- **मनो वै यज्ञस्य ब्रह्मा**[25] ॥ मनसः शक्तयः अनन्तमपरिमितः च सन्ति, अतः तम् अनन्तमिति कथयन्ति। यथा- **"अनन्तं वै मनः"**[26] परमात्मनः प्राप्तये मनः एव साधनं भवति। मनः एव परमात्मनः साक्षात्कारं कारयति । यथा**- "मनसैवेदमाप्तव्यम्"**[27]॥

॥ मनसः गुणानि ॥

अथर्ववेदे एकस्मिन् मन्त्रे सूत्ररूपे मनोविज्ञानविषये बहु वर्णनं कृतादृश्यते ।

यथा- **" मनसे चेतसे धिय, आकूतय उत चित्तये।**
**मत्यै श्रुत्याय चक्षसे, विधेम हविषा वयम् ॥"**[28]

अत्र "मनसे" मनसा संवेदना (sensation) प्रेरणा (Motivation) अर्थे गृह्णामः। "चेतसे अयं शब्देन चेतना(Consaciouness)। चिन्तनम् (Thinking) च अर्थे स्वीकुर्मः। "धियै" अयं शब्देन ध्यानम्, अवधानं वा (Attention) अर्थे प्रयुक्तः। "आकूतये " अयं शब्दार्थे अनुभूतिः (Feeling) संवेगः(Emotion) च वर्तते। "चित्तये" अयं शब्दार्थे धर्म-कर्मश्च स्मरणं (Remembering) तद् भावरूपे विस्मरणम् (Forgetting) च प्रयुक्तः। " मत्यै" अयं शब्दार्थे बुद्धिः (Intelligence) इत्यिर्थे प्रयुक्तः । "श्रुताय" अयं शब्दार्थे श्रवणं, पठनं, शिक्षणं च (Learning) अर्थे प्रयुक्तः। "चक्षसे " अयं शब्दार्थे दर्शनं, प्रत्यक्षीकरणं (Perception) अर्थे प्रयुक्तः।

शुक्लयजुर्वेदस्य चतुःत्रिंशत् अध्याये **"तन्मे मनः शिवसंकल्पमस्तु"**॥ इति षड्मन्त्रेषु मनसः सर्वाणि महत्वपूर्णविषयाणि वर्णनं कृतम्। मनः केवलं जागृत-अवस्थामामेव इतः तत्र दूरपर्यन्तं न गच्छतिः अपितु स्वप्नाऽवास्थायामऽपि तेन प्रकारेण दूरदेशं प्रति गच्छति । एषः मनः ज्योतिषु महाज्योतिः अस्ति, यः सर्वदा प्रकाशमानः भूत्वा अज्ञानस्य अन्धकारं नाशयित्वा ज्ञानविज्ञानस्य सर्वान् तत्वान् प्रकाशयति । यः मनः चेतनायाः आधारः अस्ति । सः मम मनः शुभविचारयुक्तः अस्तु।

यथा- **यज्जाग्रतो दूरमुदैति देवं तदु सुप्तस्य तथैवैति ।**

**दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु**[29] **॥**

अयं मनः प्राणिनां हृदये निवासकः अमरज्योतिः अपूर्वः यक्षः इत्युक्ते आदरणीय च तत्वमिति मन्यन्ते। मनः आत्मनः प्रतिनिधिः अस्ति, अतः आत्मतत्व इव सः अमर ज्योतिः अस्ति। मनः सत्तायाम् सर्वाणि कार्याणि भवन्ति, अतः तं मनः अनुपम यक्षमिति कथयन्ति। मनः एव प्रेरणायाः, सारः भवति । तस्य प्रेरणा विचारेण च सर्वे धर्म, अर्थ, काम, मोक्षः च पुराषार्थयति।

यथा- **"येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषुधीराः।**

**यदपूर्वं यक्षमन्तः प्रजानां तन्मेमनः शिवसंकल्पमस्तु**[30] **॥**

तृतीय मन्त्रे मनसः त्रिसृणां महत्वपूर्णगुणानाम् विषये वर्णनं विद्यते । यथा- प्रज्ञानं (Cognition) चेतस (Recollection) धृतिः (Retention) च। तैः सह एवमपि उक्तं यत् सः मनः एकं अमरज्योतिस्वकपमस्ति । तेन विना संसारस्य कोऽपि कार्यं न संभवति ।

यथा- **यत् प्रज्ञान मुतचेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।**

**यस्मान्न ऋते किञ्चनकर्म क्रियते तन्मेमनः शिवसंकल्पमस्तु**[31]**॥**

मनः वर्तमान, भूत, भविष्य च त्रिषु कालेषु व्याप्तः अस्ति। त्रिकालमपि मनसः सीमायाम् आगच्छन्ति। मनसा द्वारा एवं त्रिकालस्य दर्शनं ज्ञानं वा संभवति । कोऽपि कालं नास्ति यस्य विषये मनः चिन्तनेन मननेन च ज्ञानं कर्तुं न शक्नोति । यथा-

**येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्।**

**येन यज्ञस्तायते सप्तहोता तन्मेमनः शिवसंकल्पमस्तु**[32]**॥**

मनसि एव संसारस्य समस्तज्ञानं बुद्धिः च समाहितः अस्ति। अयं मनसि चित्तः इत्युक्ते प्रज्ञाशक्तिः विद्यते । यथा-

**यस्मिन्नृचः साम यजुंषि यंस्मिन् प्रतिष्ठिता रथनाभा विवाराः।**

**यस्मिंश्चितं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु**[33] **॥**

मनः योग्य सारथिः अस्ति। यह इन्द्रियरूपी अश्वान् सम्यक्तया नियन्त्रयति। तस्य निवासस्थानं हृदयं भवति। तस्य गतिः अकल्पनीयमस्ति। तस्मिन् मनसि असाधारणकार्यक्षमता मोक्ष प्राप्तुं दृढनिश्चयं च भवति ।

यथा – **सुषारथिरश्वानिव यन्मनुष्यान् नेनीयतेऽभी शुभिर्वाजिनइव।**

**हृत्प्रतिष्ठं यदजिरं यविष्ठं तन्मे मनः शिवसंकल्पमस्तु**[34]**॥**

एतावताः शिवसंकल्पषड्मन्त्राः यजुर्वेदे पठिताः। किन्तु एतैः षड् मन्त्रैः सह ऋग्वेदस्य परिशिष्टे **"तन्मे मनः शिवसंकल्पमस्तु"**[35] इति विंशति मन्त्राः अधिकाः सन्ति।

**<u>मानसिकरोगाः</u>**

आचार्यसुश्रुतेन रोगान् चतुर्धा विभज्यते। यथा - आगन्तुकः, शारीरिकः, मानसिकः स्वाभाविकः च। अस्त्र शस्त्रादिप्रहारेण ये आधाताः भवन्ति ते आगन्तुकाः सन्ति। अन्नपानादिविषमता-द्वारा उत्पन्नरोगाः शारीरिकाः भवन्ति ।

काम, क्रोध, लोभ, मोह, ईर्ष्या, द्वेष, शोक, इत्यादिना उत्पन्नरोगाः मानसिकरोगाः सन्ति। बुसुक्षा, पिपासा, निद्रा, जरा, इत्यादि स्वाभाविक रोगाः सन्ति ।

एतेषाम् रोगाणाम् आधारः शरीरः, मनश्च स्तः। शारीरिक-रोगान् व्याधिः, मानसिकरोगान् आधिश्च वदन्ति ।

अनेन प्रकारेण आधि-व्याधिषु च सर्वेषाम् रोगाणां संग्रहणं भवन्ति। चरकः अस्मिन् विषये समिचीनतया विचारं कृत्वा स्वस्य मतं प्रकटयति, यत् मानसिकरोगाः प्रज्ञापराधेन (बुध्यादेश उपेक्षया) उत्पन्नः भवन्ति। ईर्ष्या, शोकः, भयम्, क्रोधः, अहंकारम्, द्वेषादि च मनसः विकाराः इत्युक्ते मानसिक रोगाः प्रज्ञापराधेन उत्पन्नः भवन्ति। यथा-

**ईष्या शोक भय क्रोध मान द्वेषादयश्चये ।**

**मनोविकारास्तेऽप्युक्ताः सर्वे प्रज्ञापराधजाः**[36]**॥**

प्रज्ञापराधस्य परिभाषा करने चरकेन कृतः यत् धीः (बुद्धिः), धृतिः (धैर्य), स्मृतिः (स्मरण शक्तिः), च यदा भ्रष्टो भूत्वा यदा मनुष्यः अशुभं कर्म करोति तदा शारीरिक, मानसिक च रोगान् प्रकुपितकारकस्य कारणं प्रज्ञापराधः वदति । यथा-

**धी धृति स्मृति विभ्रष्टः कर्मयत् कुरुतेऽशुभम्।**

**प्रज्ञापराधं तं विद्यात् सर्वदोष प्रकोपणम्**[37]**॥**

प्रज्ञापराधस्य स्वरूपमस्ति यत् बुध्या सम्यक् रूपेण ज्ञान बोधं न भवति। विषम अर्थात् अनुचित रूपे कर्मेषु प्रवृत्तो भूत्वा कार्यान्

करोति। ते प्रज्ञापराधः। एषः विपरितज्ञानं विपरितप्रवृत्तिः च मनसः विषयाः सन्ति।

यथा- **बुध्या विषम विज्ञानं, विषमश्च प्रवर्तनम्।**

**प्रज्ञापराधं जानीयात्, मनसो गोचरं हि तत्[38]॥**

मानसिकरोगाणां त्रिणि कारणानि -

**1."कुलजः"** (Hereditary) एते वंशपरंपरागतरोगाः सन्ति। ये अनुकुल परिस्थतिषु उत्पन्नो भवन्ति ।

**2."मानसिकम्"** सामध्धस्येन (Psychic) मनसः विभिन्न विकारान् सामंजस्येन अनुकुलं विना प्रतिकूलेन च मानसिक रोगाः उत्पन्नाः भवन्ति।

**3."शारीरिकम्"** "(Physical) शरीरे कतिपय रासायनिक-परिवर्तनेन धातुविकारेण वा

मस्तिष्ककार्ये समस्या उत्पत्तिर्भवति, तदा मनसिक रोगाः भवन्ति ॥

**<u>मानसिकरोगनिवृत्तिः</u>**

सुश्रुतेन कथ्यते यत् तमेव मनुष्यं स्वस्थं वक्तुं शक्नुमः, यस्य मनुष्यस्य शरीरे वात, पित्त, कफ दोषाः च सामान्यावस्थायां भवतु, जठराग्नि इत्यादि अग्नयः समं सन्तु, रस, रक्तादिधातुभिः सह मलमूत्रादि व्यवस्थितं सन्तु, तथा यस्य आत्मा इन्द्रियाणि मनश्च प्रसनो सन्तु ।

यथा-

**समदोषः समाग्निश्च समधातु मलक्रियः।**

**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते[39]॥**

चरकेनाऽपि अस्मिन् विषये उपदिश्यते यत् यः कोऽपि सदा सर्वदा सुखी, स्वस्थं निरोगं च भवितुमिच्छति, सः स्वस्य आहारे (भोजने), आचारे (आचरणे) तथा स्वस्य प्रयत्नेषु पूर्णनियन्त्रणं कुर्यात् ।यथा-

**आहाराचारचेष्टासु सुखार्थी प्रेत्य चेह च।**

**परं प्रयत्नमातिष्ठेद् बुद्धिमान् हितसाधने[40]॥**

चरकस्य एको सामान्यनिर्देशः अस्ति यत् मल (शौच) मूत्र च वेगं मा स्थगयतु, किमर्थमित्युक्ते एतया एताभ्यां स्थगनेन अनेक व्याधिमुत्पन्न भवन्ति।

यथा- **न वेगान् धारयेद् धीमान् जातान्सूत्रपुरीषयोः[41]**

मनसः प्रसन्नतां स्वस्थताञ्च मनुष्यं निरोगं करोति। मनदूषितेन रोगाणां कारणं भवति। अतएव मैत्रायणी उपनिषदि उक्तमस्ति यत् मनः एव मनुष्याणां बन्धनं (व्याधियुक्त) मोक्षस्य (रोगरहितस्य निरोगस्य वा) च कारण भवति॥

यथा- **मन एव मनुष्याणां कारणं बन्धमोक्षयोः[42]॥**

**संदर्भसूची –**

[1](बृ. उ. 4.1.6)

[2](तै. ब्रा- 3.10.8.5-6)

[3](यजुः-२.२४)

[4](गो. ब्रा-1.2.11)

[5](तै. ब्रा-3.7.1.2)

[6](गो.ब्रा-1.5.15)

[7](श.ब्रा-6.1.11)

[8](कौषी. ब्रा-२८.३)

[9](गो. ब्रा- 1.2.11)

[10] (श. ब्रा-10.1.2.3)

[11] (श. ब्रा- 7.5.२.५२)

[12] (जै. उ. ब्रा-1.58.3)

[13] (ऐत. ब्रा- 5.25)

[14] (ताण्ड्य. ब्रा- 11.1.3)

[15] (श.ब्रा-6.7.1.21)

[16] (श.ब्रा-14.3.2.3)

[17] (श.ब्रा-14.4.3.8)

[18] (श.ब्रा-14.4.3.9)

[19] (बृह.उप-4.1.6)

[20] (बृह.उप-3.9.10)

[21] (तैत्ति.उप-1.6.1) (बृह. उ-5.6.1)

[22] (बृह. उप-3.9.11)

[23] (बृह - 1.4.17)

[24] (तै-उप -२.3)

[25] (बृह- उप-3.1.6)

[26] (बृह-3.1.9)

[27] (कठ उप-2.1.11)

[28] (अ-6.41.1)

[29] (यजु-34.1)

[30] (यजुः- ३४.२)

[31] (यजुः-34.3)

[32] (यजुः-३५.५)

[33] (यजुः- 34.5)

[34] (यजुः-34.6)

[35] (सु.स- 1.32. तः 34)

[36] (चरक. सूत्र-7.52)

[37] (च. शारी- 1.102)

[38] (च. शारी-1.109)

[39] (सु.स-15.48)

[40] (च. सू-7.60)

[41] (च. सू-7.3)

[42] (मैत्रा उप- 4.11)